वक्ष्यते”। “अतोऽन्यतमं सोममुपयुयुक्षुः सर्वप्रकारपरिचारकोपेतः प्रशस्तदेशे त्रिवृतमगारं कारयित्वा हृतदोषः प्रतिसंसृष्टः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु अंशुमन्तमादायाध्वरकल्पेनाहृतमभिषुतमभिहुतं चान्तरान्तराकृतमङ्गलः सोमकन्दं सुवर्णसूच्या विदार्य्य पयोऽगृह्णीयात्सौवर्णे पात्रेऽञ्जलिमात्रं, ततः सकृदेवोपयुञ्जीत नास्वादयंस्ततउपस्पृश्य शेषमप्स्ववसाद्य यमनियमाभ्यामात्मानं संयोज्य वाग्यतोऽभ्यन्तरतः सुहृद्भिरुपास्यमानो विहरेत्”।

**दूर्वेष्टका** स्त्री यज्ञाङ्गे चितिरूपेष्टकाभेदे “तमग्निरब्रवीत्। उपाहमायानीति केनेति पशुभिरिति तथेति पश्विष्ट कयाह तदुवाचैषा वाव पश्विष्टका यद्दूर्वेष्टका तस्मात् प्रथमायै स्वयमातृण्णाया अनन्तर्हिता दूर्वेष्टकोपधीयते तस्मादस्या अनन्तर्हिता ओषधयोऽनन्तर्हिताः पशवो ऽनन्तर्हितोऽग्निरनन्तर्हितो ह्येष एतयोपैत्” शत० ब्रा० ६।२।३।२।

**दूलाश** त्रि० दूडाश+डस्य वा लः। दुःखेन हिंस्ये।

**दूली** स्त्री दूरं दूरताऽस्त्यस्याः अच्, दू–खेदे सम्प०भावे क्विप् तां राति ददाति वा रा–क रस्य लः दुरे खेदाय लायते गृह्यते ला–क घञर्थे क वा गौरा० ङीष्। नील्यां शब्दर०। “शृणुष्वेह महाबाहो नीलीरक्तस्य धारणात्। वाससोगणशार्दूल! गदतो मम कृत्स्नशः। पालनाद्विक्रयाच्चैव तद्वृत्तेरुपजीवनात्। पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति” भविष्यपु० तस्यावपनक्रयादेर्निषेधेन दूरीकार्यत्वात् तथात्वम् तदुपजीवने च पापोत्पादनेन तस्याः दुःखहेतुत्वात् वा तथात्वम्। स्वार्थे क। दूलिका तत्रार्थे

**दूश्य** न० दू–खेदे सम्पदा०भावे क्विप् तां श्यायते गमयति अन्तर्भूतण्यर्थे श्यै–गतौ क। वस्त्रनिर्मिते गृहे (ताँबु) सारसुन्दरी।

**दूषक** त्रि० दुष–णिच्–ण्वुल्। १दोषजनके “दूषकतावीजानिरुक्तेः” सर्वदर्शसंग्रहः “वेदविक्रयिणश्चैव वेदानां चैव दूषकाः। वेदानां निन्दकाश्चैव ते वै निरयगामिनः” भा०अनु० १६४४श्लो०। “पाषण्डाऽदूषकाश्चैव समजानाञ्च दूषकाः। ये प्रत्यवसिताश्चैव ते वै निरयगामिनः” भा० अनु० १६४८श्लो०। “कूटशासनकर्तृंश्च प्रकृतीनाञ्च दूषकान्” (हन्यात्) मनुः। २खले च त्रिका०

**दूषण** न० दूषि–भावे ल्युट्। सदोषतासम्पादने “दूषणस्यादूषणार्थं च परित्यागो महीयसः। अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते” काम०नी०। दूषि–कर्तरि ल्यु। २दोषजनके त्रि० “पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्। स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि च” मनुः। ३राक्षसभेदे पु० खरशब्दे २४६६ पृ० उदा०

**दूषणारि** पु० ६त०। श्रीरामे शब्दरत्ना० तस्य रामेण वधकथा खरशब्दे २४६६पृ० दृश्या।

**दूषयितृ** त्रि० दूषि–शीलार्थे तृच्। दूषणशीले [ङीप्।

**दूषि(षी)** स्त्री दूषि–इन्। नेत्रमले (पिँचुटि) शब्दमा० वा

**दूषिका** स्त्री दूषि+स्वार्थे क ण्वुल् वा। १नेत्रमले (पिँचुटि) २तूलिकायां मेदि०। ३दूषणकर्त्र्यां स्त्रियाञ्च। दूषी+स्वार्थे क वा न ह्रस्वः। तत्रार्थे “वयसा मुष्वा अस्रुभिर्ह्रादिनीर्दूषीकाभिः”। यजु० २५।९ “शाल्मलीकण्टकप्रख्याः कफमारुतशोणितैः। जायन्ते पिडका यूनां वक्त्रे या मुखदूषिका” सुश्रुतः “स्त्रियास्तथाऽपचारिण्या निष्कृतिः स्याद्दूषिका” भा०शा० ३४अ० पुंसि तु ण्वुलि दूषक इत्येव। “नह्यहं प्रकृतिद्वेषी नाहं प्रकृतिदूषकः” हरिवं० १८९अ०

**दूषित** त्रि० दूषि–क्त। १दत्तदूषणे २प्राप्तदूषणे ३अभिशस्ते मैथुनापवादयुक्ते ४नष्टकन्याभावायां स्त्रियां स्त्री शब्दरत्ना०।

**दूषीविष** न० दूषयति दूषि–बा० ई कर्म०। सुश्रुतोक्ते धातुदूषके विषभेदे यथा “यत् स्थावरं जङ्गमकृत्रिमं वा देहादशेषं यदनिर्गतं तत्। जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा। स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति। वीर्याल्पभावान्न निपातयेत्तत् कफावृतं वर्षगुणानुबन्धि। तेनार्द्दितो भिन्नपुरीषवर्णो विगन्धवैरस्यमुखः पिपासी। मूर्च्छन् वमन् गद्गदवाग्विषण्णो भवेच्च दूष्योदरलिङ्गजुष्टः। आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी। भवेन्नरो ध्वस्तशिरोरुहाङ्गो विलूनपक्षस्तु यथा विहङ्गः। स्थितं रसादिष्वथ वा यथोक्तान् करोति धातुप्रभवान् विकारान्। कोपञ्च शीतानिलदुर्दिनेषु यात्याशु पूर्वं शृणु तत्र रूपम्। निद्रागुरुत्वञ्च विजृम्भणञ्च विश्लेषहर्षावथवाङ्गमर्द्दः। ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठमोहान्। धातुक्षयं पादकरास्यशोफं दकोदरं छर्द्दिमथातिसारम्। वैवर्ण्यमूर्च्छाविषमज्वरान्वा कुर्यात् प्रवृद्धां प्रबलां तृषां वा। उन्मादमन्यज्जनयेत्तथान्यदानाहमन्यत् क्षपयेच्च शुक्रम्। प्रगाढमन्य-